# नारायणोपनिषत्

## *nārāyaṇopaniṣat*

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

*om saha nāvavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai |*

तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

*tejasvināvadhītamastu mā vidviṣāvahai || om śāntiḥ śāntiḥ śāntiḥ ||*

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात्-प्राणो जायते ।

*om atha puruṣo ha vai nārāyaṇo'kāmayata prajāḥ sṛjeyeti | nārāyaṇāt-prāṇo jāyate |*

मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।

*manaḥ sarvendriyāṇi ca | khaṁ vāyurjyotirāpaḥ pṛthivī viśvasya dhāriṇī |*

नारायणाद्-ब्रह्मा जायते । नारायणाद्-रुद्रो जायते । नारायणादिन्द्रो जायते ।

*nārāyaṇād-brahmā jāyate | nārāyaṇād-rudro jāyate | nārāyaṇādindro jāyate |*

नारायणात्-प्रजापतयः प्रजायन्ते ।

*nārāyaṇāt-prajāpatayaḥ prajāyante |*

नारायणाद्-द्वादशादित्या रुद्रा वसवस्-सर्वाणि च छन्दाग्ंसि ।

*nārāyaṇād-dvādaśādityā rudrā vasavas-sarvāṇi ca chandāgṁsi |*

नारायणादेव समुत्पद्यन्ते । नारायणे प्रवर्तन्ते । नारायणे प्रलीयन्ते ॥ १ ॥

*nārāyaṇādeva samutpadyante | nārāyaṇe pravartante | nārāyaṇe pralīyante || 1 ||*

ॐ । अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः ।

*om | atha nityo nārāyaṇaḥ | brahmā nārāyaṇaḥ | śivaśca nārāyaṇaḥ |*

शक्रश्च नारायणः । द्यावापृथिव्यौ च नारायणः ।

*śakraśca nārāyaṇaḥ | dyāvāpṛthivyau ca nārāyaṇaḥ |*

कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वश्च नारायणः । अधश्च नारायणः ।

*kālaśca nārāyaṇaḥ | diśaśca nārāyaṇaḥ | ūrdhvaśca nārāyaṇaḥ | adhaśca nārāyaṇaḥ |*

अन्तर्बहिश्च नारायणः । नारायण एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम् ।

*antarbahiśca nārāyaṇaḥ | nārāyaṇa evedagṁ sarvam | yadbhūtaṁ yacca bhavyam |*

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः ।

*niṣkalo nirañjano nirvikalpo nirākhyātaḥ śuddho deva eko nārāyaṇaḥ |*

न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति ॥ २ ॥

*na dvitīyo'sti kaścit | ya evaṁ veda | sa viṣṇureva bhavati sa viṣṇureva bhavati || 2 ||*

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् ।

*omityagre vyāharet | nama iti paścāt | nārāyaṇāyetyupariṣṭāt |*

ओमित्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि ।

*omityekākṣaram | nama iti dve akṣare | nārāyaṇāyeti pañcākṣarāṇi |*

एतद्वै नारायणस्याष्टाक्षरं पदम् ।

*etadvai nārāyaṇasyāṣṭākṣaraṁ padam |*

यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवस्सर्वमायुरेति ।

*yo ha vai nārāyaṇasyāṣṭākṣaraṁ padamadhyeti | anapabruvassarvamāyureti |*

विन्दते प्राजापत्यग्ं रायस्पोषं गौपत्यम् ।

*vindate prājāpatyagṁ rāyaspoṣaṁ gaupatyam |*

ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । य एवं वेद ॥ ३ ॥

*tato'mṛtatvamaśnute tato'mṛtatvamaśnuta iti | ya evaṁ veda || 3 ||*

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्। अकार उकार मकार इति।

*pratyagānandaṁ brahmapuruṣaṁ praṇavȧsvarūpam| akāra ukāra makȁra iti |*

तानेकधा समभरत्-तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्म-संसार-बन्धनात्।

*tānekadhā samabharat-tadetȧdomiti | yamuktvȁ mucyȧte yogī janma-saṁsȧra-bandhanāt |*

ॐ नमो नारायणायेति मन्त्रोपासकः। वैकुण्ठ-भुवन-लोकं गमिष्यति।

*om namo nārāyaṇāyeti mȧntropāsakaḥ | vaikuṇṭha-bhuvana-lokȧṁ gamiṣyati |*

तदिदं परं पुण्डरीकं विज्ञानघनम्। तस्मात्-तदिदावन्मात्रम्।

*tadidaṁ paraṁ puṇḍarīkaṁ vijñānaghanam | tasmāt-tadidȁvanmātram |*

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम्।

*brahmaṇyo devȧkīputro brahmaṇyo mȧdhusūdanom | sarvabhūtasthamekȧṁ nārāyaṇam |*

कारणरूपमकार परब्रह्मोम्॥ ४॥

*kāraṇarūpamakāra pȧrabrahmom || 4 ||*

एतदथर्वशिरोयोऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति।

*etadatharvaśirȯyo'dhīte prātarȧdhīyāno rātrikṛtaṁ pāpȧṁ nāśayati |*

सायमधीयानो दिवसकृतं पापं नाशयति।

*sāyamȧdhīyāno divasakṛtaṁ pāpȧṁ nāśayati |*

माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात्प्रमुच्यते।

*mādhyandinamādityābhimukhȯ'dhīyānaḥ pañcapātakopapātakȁtpramucyate |*

सर्ववेदपारायणपुण्यं लभते।

*sarvavedapārāyaṇapuṇyaṁ labhate |*

नारायण-सायुज्यमवाप्नोति नारायण-सायुज्यमवाप्नोति।

*nārāyaṇa-sāyujyamȧvāpnoti nārāyaṇa-sāyujyamȧvāpnoti |*

य ए॑वं वे॒द । इत्यु॑प॒नि॑षत् ॥ ५ ॥

*ya e̍vaṁ ve̱da | ityu̍pa̱niṣa̍t || 5 ||*

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।

*om sa̱ha nā̍vavatu | sa̱ha nau̍ bhunaktu | sa̱ha vī̱rya̍ṁ karavāvahai |*

ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

*te̱ja̱svinā̱vadhī̍tamastu̱ mā vi̍dviṣā̱vahai̎ || om śānti̱ḥ śānti̱ḥ śānti̍ḥ ||*